महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।

इन्द्रियाणि दशैकं च पंच चेन्द्रियगोचराः ॥ १३.६ ॥

mahābhūtānyahaṅkāro buddhiravyaktameva ca |
indriyāṇi daśaikaṁ ca pañca cendriyagocarāḥ || 13.6||

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।

एतत्क्शेत्रं समासेन सविकारमुदाहृतम् ॥ १३.७ ॥

icchā dveṣaḥ sukhaṁ duḥkhaṁ saṅghātaścetanā dhṛtiḥ |
etatkśetraṁ samāsena savikāramudāhṛtam || 13.7||

अमानित्वमदम्भित्वमहिंसा क्शान्तिरार्जवम् ।

आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ १३.८ ॥

amānitvamadambhitvamahiṁsā kśāntirārjavam |
ācāryopāsanaṁ śaucaṁ sthairyamātmavinigrahaḥ || 13.8||

इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।

जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ १३.९ ॥

indriyārtheṣu vairāgyamanahaṅkāra eva ca |
janmamṛtyujarāvyādhiduḥkhadoṣānudarśanam || 13.9||

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।

नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ १३.१० ॥

asaktiranabhiṣvaṅgaḥ putradāragṛhādiṣu |
nityaṁ ca samacittatvamiṣṭāniṣṭopapattiṣu || 13.10||